श्रीःगुरुभ्यो नमः महागणपतये नमः

# ।। श्रीपद्मपुराणम् ।।

**अनुवादकः - डा. माधवपाण्डुरङ्गी**

## आदिखण्डः

### अध्याय - १

नैमिषारण्ये वसन्तं शौनकं द्रष्टुं सकलदेशीयऋषयः आगच्छन् । तदा तत्र सूतोऽपि आगतः । परस्परं सत्कृताः स्वोचितासने उपविष्टाः । तदा ऋषयः सूत पुराणिकं जगत्सृष्टि-नदि-पर्वतादिविषये अपृच्छन् । सूतश्च तदा पद्मपुराणम् उपदेष्टुं प्रारभत ।

पुराणेऽस्मिन् षट्खण्डाः, पञ्चपञ्चाशत्सहस्रसङ्ख्याकाः श्लोकाश्च सन्ति । खण्डाश्चैवं १. आदिखण्डः २. भूमिखण्डः ३. ब्रह्मखण्डः ४. पाताळखण्डः ५. क्रियाखण्डः ६. उत्तरखण्डः, खण्डषट्के सर्वे विषयाः उपपादिताः । विशेषतः सर्वोत्तमं विष्णुं प्रतिपादयतीति पुराणमिदं महत्वं भजते । स्वयं विष्णुना ब्रह्माणं प्रति, उपदिष्टम् अतश्च सर्वपापनवारकमिदं शोभते ।

### अध्यायः - २

**जगत्सृष्टिः** - जगत् प्रळयानन्तरं ब्रह्ममात्रम् अवशिष्टम् । ब्रह्म च नित्यं, अविकारि, शुद्धम् । ततश्च ब्रह्म सृष्टुं ऐच्छत् । तदा कार्योन्मुख्याः प्रकृत्याः महत्तत्वम् अजायत । ततः अङ्काकार तत्वं, शब्दादिपञ्चतन्मात्राः, पञ्चभूताः, दशइन्द्रियाणि मनश्च व्यजायत ।

विष्णुशक्तिः अण्डमभूत् । गर्भपर्वतोऽभूत् । गर्भजलमेव समुद्ररूपतां प्रापत् । ब्रह्मणः अण्डेऽस्मिन् गिरयः द्वीपाः सुरासुरादयः व्यजायन्त । एवं क्रमेण विस्तृतं जगत् उत्पन्नम् ।

### अध्यायः - ३

भूमौ रूप-रसादिगुणाः वर्तन्ते, जले च केलवं रूप-रस-स्पर्शा वर्तन्ते । एवं क्रमेण तेजसि-वायौ-आकाशे रूपादिगुणाः अल्पाः भवन्ति ।

लयकाले पृथिवी जले, जलं तेजसि, तेजः वायौ, वायुश्च आकाशे लीनो भवति ।

**सुदर्शनद्वीपः** - चक्राकारजलैः समुद्रसदृशपर्वतैश्च शोभितः । नानाविधदेशाः अत्र विराजन्ते । द्वीपश्चायं लवणसमुद्रेण परिवृतः । द्वीपेऽस्मिन् पिप्पलखण्डः शशखण्डश्च वर्तते । सकलौषधसस्यैः सम्पन्नोऽयं देशः । शशखण्डे च (भरतखण्डे) हिम-हेम-कूट-निषध-नील-श्वेत-शृङ्गं पर्वताः सन्ति । भरतवर्षस्य पार्श्वे हैमवत्वर्षः शोभते । तत्पार्श्वे हरिवर्षः, नीलपर्वतात् दक्षिणतः निषधपर्वतः, तदुत्तरे माल्यवान्पर्वतः । तत्पार्श्वे गन्धमदनपर्वतः, अस्य परितः भद्राश्व-केतुमाला-जम्बूद्वीप-उत्तरकुरु इति द्वीपचतुष्टयं प्रकाशते ।

सुपार्श्वसुतः सुमुखः, (पक्षी) सुवर्णमयं काकं दृष्ट्वा एवम् अचिन्तयत् । अयं मेरुपर्वतः पक्षिणां महत्वं न जानाति । अतश्चाहं देशमिमं विहाय जम्बूद्वीपस्य महाजनपदाख्यं विषयं यास्यामि । तत्र च सर्वं सुवर्णमयम् । सर्वाः देवताः वसन्ति । अत्र मनुष्याः, दशसहस्रवर्षायुषाः । अरोगिणः । श्वेतवर्षः नीलकमलैः शोभितमस्ति । हिरण्यमयवर्षश्च अस्मादपि उत्तमः । ऐरावतवर्षश्च नैकरम्यप्रदेशैः संवलितः । इलावृतवर्षोऽपि गुणपूर्णो विराजते ।

एवं अध्यायेऽस्मिन् हेमकूटः-हिरण्यं-शृङ्गनिषध-नील-शृङ्ग प्रभृतिपर्वतानां, नाग-काश्यप-कर्णप्रमुखद्वीपानाञ्च वर्णनं दृश्यते ।

सरस्वती नदी दृश्या-अदृश्या च प्रवहति इति वर्णितम् ।

**अध्यायः - ४**

**उत्तरकुरु इत्यादि** - मेरोः उत्तरे, नीलपर्वतात् दक्षिणे उत्तरकुरुदेशः वर्तते । तत्र नैकविधवृक्षाः गिरयः रत्नानि च सन्ति । तत्रत्यस्त्रीपुरुषाः सदा रमणीयाः शोभन्ते ।

मेरोः पूर्वे भद्राश्वः विराजते । तत्र च कालाम्रको नाम चूततरुः वर्तते ।

जम्बूद्वीपः ११०० योजनविस्तृतः वर्तते । माल्यवत्पर्वतविस्तारश्च पञ्चाशत्सहस्र (५०,०००) योजनमितः वर्तते । अत्रस्थाः (६६,०००) षट्षष्टिसहस्रवर्षाणि यावत् स्थित्वा सूर्यतापम् असहमानाः चन्द्रं प्रति यान्ति ।

**अध्यायः - ७९**

**अङ्गारकमहिमा -** अङ्गारकः ईश्वरांशात् सम्भूतः । सुन्दरः अयं शक्तः भूमेः जातः । अस्य चरितं पुरा हिरण्यक्ष सन्तानः अन्धकः नाम असुरः इन्द्रप्रभृतीन् विजिग्य बबन्ध । तदा देवैः प्रार्थितः ब्रह्मा श्रद्धाकाम-चिकित्सान् विसृज्य तान् सर्वत्र स्थापयामास । अन्धकस्तु कामवशः पार्वतीं चकमे । सा तु बौद्धसन्यासिनी वेषधारी शिवं प्रत्यागच्छत् । अन्धके तत्रागते देव दानवयोः घोरं युद्धं प्रावर्तत । तदा पुनः पुनः मृतान् दैत्यान् जीवयन्तं शुक्राचर्यं शिवः अखादत् । किञ्चित् कालान्तरं शुक्रः शिवोदरात् भूमौ पपात ।

इत्यतः सः भौमः अभवत् । ततः अयं पुनः चण्डिकया हतः । एवं शुक्रः एव अङ्गारकग्रहो अभूत् । चतुर्थ्यां मङ्गळवासरे अस्य अर्चनं विशिष्टफलदायकम् ।

अध्यायः - ८०

दुर्गापूजा + महिमा -

शिवपत्न्याः चण्डिकायाः आराधनेन सर्वाभीष्टा सिद्ध्यन्ति । आश्वीन शुक्लनवम्यां उत्तरायणपुण्यकाले सूर्यचन्द्रग्रहणे - पर्वकालेषु जल-क्षीर-दर्भाग्रश्वेतसर्षप -बिल्वप्रत्रैश्च अर्चिता देवी प्रीता भवति चम्पक-मन्दार-कुन्द-करवीर-अर्कादि पत्रैः तां विशेषेण पूजयेत् । देव्याः महिषाजानां निपातनं अत्यन्तं तृप्तिकरं भवति ।

पूजनाल्लेपनं श्रेष्ठं लेपनात्तर्पणं स्मृतम् ।
तर्पणान्मांसदानं तु महिषाजनि पातनम् ।। ११० ।।

अध्यायः - ८१

दुर्गामहिमा - ब्रह्मा-रुद्रः-विष्णुश्च दुर्गापूजनात् पूज्याः सन्ति । कुबेरः देव्याः सुवर्णप्रतिमां वायु देव पित्तलप्रतिमां, वसवः देव्याः कांस्यप्रतिमां इन्येवं अग्नि-सूर्य-चन्द्रादयो, दैत्यपिशाचाः सर्वेऽपि स्वयोग्यप्रतिमां कारयित्वा देवीं पूजयन्ति ।

देव-दैत्य-पिशाचाः सर्वे घृत-गुग्गुलैः दीपं प्रज्वाल्य दुर्गां पूजयन्ति ।

देव्याः नवम्यां अजमहियोः मांसनिवेदनं तृप्तिकरं भवति । एवं नारिकेल -खर्जूर बीजपूरफलानि देव्यै समर्पयेत् । दुर्गास्तवपठनात् तल्लोकः प्राप्यते ।

दुर्गास्तोत्रं - श्लोक -६६-७७ (श्लोकपर्यन्तम्)

**अध्यायः - ८२**

**बुध-गुरु-शुक्र-शनि-राहुवर्णनम् -** बुधः बाणाकारः, कर्पूरं मुद्गान् पीतवस्त्रान् बुधप्रीत्यै दद्यात् ।

गुरुं पट्टिकारमण्डले पूजयेत् । चणकं-पीतवस्त्रं सुवर्ण-पुष्परागं-अस्य प्रीत्यै दद्यात् ।

शुक्रः - पञ्चकोराकारस्थः तण्डुलं-श्वेतवस्त्रं - रजतं सुगन्धद्रव्यैः अमु तर्पयेत । गौः कृष्णवस्त्रं सुवर्ण-इन्द्रनीलदानैःअयं प्रीतो भवति ।

शनिः - मानुषाकारमण्डलस्थितः - कृष्णैः गन्धैः पुष्पैः वस्त्रैः पूजयेत् । लोह-पिप्याक-तिल दानेन अयं तृप्तो भवति ।

राहुः शनेरिव मानुषाकारवर्णः सूर्याकारः गोमेध-सर्षप-तिलमाषदानैः तृप्यति ।

केतुः -ध्वजाकारः सुवर्ण धान्यदानैः सन्तृप्तो भवति । अपि च एतेषां ग्रहादीनां प्रीत्यर्थं 'आकृष्णेन' इत्यादि मन्त्रान् पठेत् ।

।। इति सृष्टिखण्डः ।।

**अनुवादकः - डा. माधवपाण्डुरङ्गी**

श्रीःगुरुभ्यो नमः महागणपतये नमः

# ।। श्रीपद्मपुराणम् ।।

**अनुवादकः - डा.श्रीकान्त बायरि**

## पातालखण्डः

### अध्याय - १

सर्वे ऋषयः सूतपुराणिकस्य सविधे भगवन्महिमानं श्रुण्वन्ति स्म । स्वर्गखण्डानन्तरं इदानीं पातालखण्डं श्रावयति सूतपुराणिकः ।

तत्रादौ सर्वे ऋषयः श्रीरामस्य चरितम् वर्ण्यताम् इति सूतं प्रार्थितवन्तः । तदनुसारेण सूतः आदौ श्रीरामचरितं वक्तुं प्रारभत ।

रामकथा -

इमां रामकथां शेषदेवः वात्स्यायनमुनिं प्रति कथयामास । तां कथामेव सूतः ऋषिभ्यः श्रावयामस । आदौ वात्स्यायनः शेषम् अप्रार्थयत् । भो स्वामिन् पुरा त्वं भूगोलं, खगोलं, ज्योतिर्गणं इत्यादीनि अवर्णयः । तथैव अनेकानेकराजवंशानपि अवदः इदानीं सूर्यवंशजातस्य रामस्य कथां श्रोतुमिच्छामि । सर्वपापनिवारकं पुण्यप्रदायकं रामचरितं कृपया श्रावय इति । तश्छ्रुत्वा मुदितमनाः शेषः रामकथां वक्तुं उपाक्रमत् । ब्रह्मादयोऽपि इमां कथां वर्णयितुं न शक्ताः । कोऽहं तद्वर्णितुम् । तथाऽपि यावद्वर्णयितुं समर्थः तावत् कथयामि । यथा अपारे गगने विहगः स्वसामर्थ्यानुगुणेन प्लवति तथा । अपि च इदं रामचरितं शतकोटिश्लोकपर्यन्तम् । ये ये यथा यथा आमनन्ति ते ते तथा तथा वर्णयन्ति ।

यथा अग्निसंयोगात् सुवर्णं शुद्धं भवति तथा सीतारामचरितवर्णनात् मम (शेषस्य) बुद्धिः अकलुषिता भवति । अतः मम सामर्थ्यानुगुणं वर्णयामि । इत्युक्तः शेषः क्षणकालं तूष्णीं ध्यानासक्तश्च बभूव । ततः ध्यानादुत्थितः सन् इमां रामकथां वक्तुं आरेभे । ।

**नन्दीग्रामे भरतस्य वैराग्यम् ।**

रामानुजः भरतः राज्यभारार्थं रामेण नियुक्तः सन् नन्दीग्रामे एव वसन् अयोध्यां बुभुजे । सोऽपि सीतारामवत् वल्कलं चीर्णं धृत्वा जीर्णदेही अभवत् । मनसि सीतारामयोः वनवासदुःखं स्मृत्वा स्वयं दुःखी बभूव । प्रतिदिनं सूर्यं एवं प्रार्थितवान् । हे सूर्यदेव सीतारामौ मदर्थं काननं ययतुः । तौ तत्र कीदृशं क्लेशं अनुभवतः इति न जाने । अतः मत्कृतं एनं (पापं) नाशयतु इति । एवं विधं दुःखं अनुभवन् सः भरतः नन्दिग्रामे उवास ।

**विशेषविचारः -**

आचार्यमध्वः महाभारततात्पर्यनिर्णये रामायणम् शतकोटि विस्तारं वर्तते, इति वर्णितुं, न ब्रह्मादयोऽपि शक्नुवन्ति इति सूचितवान् । स एव विचारः अस्मिन् पुराणेऽपि सुष्ठु प्रकटितः ।

१. 'चरितं रघुनाथस्य शतकोटिसुविस्तरम्' (पद्म.पु.पा.खं.१.१४)

२. 'यत्र ब्रह्मादयो देवा मोहिताः न विदन्त्यपि' (पद्म.पु.पा.खं.१.१२)

**अध्याय - २**

**रामभरतयोः सङ्गमः -**

श्रीरामः एवं विचारितवान् । अयं भरतः चतुर्दशवर्षानन्तरम् दिनमेकमपि न सहते । रामागमनं कातरेण निरीक्षिष्यति । अतः हनूमन्तं आज्ञापयामास । शीघ्रं भरतं एत्य स्वागमनविषयं निवेदय इति । तदा हनूमान् तथैव कृतवान् । रामागमनं निरीक्षमाणः भरतः हृष्टमनसा रामं स्वगती कृतवान् । तस्य पादयोर्निपत्य स्वनिमित्तं अपराधं क्षन्तुं प्रार्थयित्वा पुनः पुनः रामसीतयोः पादयोः निपपात । ततः सन्तुष्टः रामः तेनैव साकं पुष्पकविमानेन अयोध्यां जगाम ।

**अध्याय -३**

**रामस्वागतम्** - अयोध्यावासिनः सर्वे रामागमनवार्तां श्रुत्वा अतीव मुमुदुः । कौसल्यादयो मातरोऽपि रामं द्रष्टुम् उद्युक्तमनाः आसन् । सर्वे प्रजाः पत्तने उत्सवं प्रकुर्वन्तः रामं स्वागतीचक्रुः ।

**अध्याय - ४**

कौसल्या तु रामागमनवार्तां सत्यमिति विश्वस्तुं न शशाक । अतः सा मन्त्रीं प्रति पुनः पुनः किमिदं सत्यम् ? न मिथ्या किल इति पृष्टवती । तदा मन्त्री समागतौ सीतारामौ दर्शयामास । तद्दृष्ट्वा कौसल्या सन्तोषातिशयेन मूर्च्छां प्रापत् । ततः श्रीरामः प्रथमतः कैकेय्याः गृहं प्राविशत् । तत्र मातरं नत्वा एवम् अवदत् । हे अम्ब त्वदादेशं अहं अपूरयम् । अपि पुनः किञ्चिदस्ति चेत् वद तदपि निःसंशयेन पूरयामि । इति । तदा लज्जिता सा तूष्णीं अतिष्ठत् । रामोऽपि तत्रैव मौनेन तस्थौ । ततः कैकेयी मन्द्रस्वरेण त्वद्गृहं गच्छ इत्युक्तवती । श्रीरामः तस्मात् सुमित्रायाः गृहं गत्वा तत्रत्यां मातरं नत्वा, ततः स्वमातरं कौसल्यां प्रति गत्वा नमस्कारं अकरोत् । ततः कौसल्या सीतायाः पातिव्रत्यं बहु प्रशंस्य रामस्य पट्टाभिषेकं कर्तुं मुहूर्तं निश्चेतुं मन्त्रिणः आज्ञापयत् । तथा च मन्त्रिणोऽपि कुलगुरोः वसिष्ठस्य नेतृत्वे श्रीरामपट्टाभिषेकं च अकुर्वन् ।

१. राम रामेति रामेति रमे रामे मनोरमे ।।(पद्म.पु.उ.खं. २८०-२१)

रुद्रेण सहस्रनामतुल्यं रामनामोपदेशः कृतः ।

**स्तोत्रविभागः**

रुद्रकृतं रामाष्टोत्तरशतस्तोत्रम् ।

ओं श्रीरामो रामचन्द्रश्च रामभद्रश्च शाश्वतः ।।(पद्म.पु.३.खं.२८१.३०-७०)

**अध्यायः - २८२**

**विष्णुसर्वोत्तमत्वप्रतिपादनम् -**

यदा दिलीपः वशिष्ठं प्रति रुद्रयोनिलिङ्गकारणं पृच्छति । तदा वशिष्ठः विष्णुसर्वोत्तमत्वकथां श्रावयति । एकदा स्वायम्भुवमनुः मेरुगिरौ बृहत्यागं आयोजयामास । तत्र नानामुनिगणाः समागताः आसन् । तत्र एका जिज्ञासा प्रादुरभवत् । ब्रह्मविष्णुमहेशादीनां मध्ये कः सर्वोत्तमः ? इति । तत्र अनेके मुनयः श्रीकृष्ण एव सर्वोत्तमः इति प्रतिपादयन् । तथापि केचन मुनयः संशयग्रस्ताः अभवन् । तदा सर्वे भृगुं परीक्षणार्थं प्राहिणोत् । प्रथमतः भृगुः कैलासं परीक्षणार्थं ययौ । तत्र द्वारमध्ये नन्दी तं अन्तःप्रवेष्टुं नानुमोदयत् । तदा सः दशदिनपर्यन्तं तत्रैव रुद्रदर्शनार्थं अतिष्ठत् । नारीसङ्गमग्नः रुद्रः भृगुं न पुरस्कृतवान् । तदा क्रुद्धः भृगुः यतो त्वं स्त्रीरत्यै माम् अवमन्यसि अतः त्वं योनिलिङ्गस्वरूपम् आप्नुहि इति शशाप । तथैव अयं रुद्रः तमसा ब्राह्मणं अवमन्यते अतः सः रुद्रः अपूज्यः भवतु तथैव तस्यान्नं, पुष्पं, फलं तद्दत्तं हविः न स्वीकारार्हाः भवन्तु इति । इत्येवं शप्त्वा भृगुः ब्रह्मलोकं अगच्छत् । तदा तत्र ब्रह्माऽपि तं नार्चयामास । तदा क्रुद्धः भृगुः त्वं लोकेषु अपूज्यो भव इति शशाप ।

ततः भृगुः तस्मात् वैकुण्ठं अगमत् । तत्र लक्ष्मीकरसरोजाभ्यां मृज्यमान पदद्वयं नागपर्यङ्के शयानं कमलापतिं ददर्श । तं तथा दृष्ट्वा क्रुद्धः भृगुः विष्णोः वक्षसि सव्यं पादं प्रतिक्षेप । तस्मिन्नेव क्षणे उत्थितः विष्णुः धन्योऽस्मि मुनिश्रेष्ठ इत्युक्त्वा हस्ताभ्यां तस्य चरणं शनैः मृदित्वा कृतकृत्योऽस्मि, त्वत्पादस्पर्शनात् मङ्गलं मे भविष्यति इति मधुरं वाक्यमब्रवीत् । अपि च

ब्राह्मणपादपांसूनां महिमानं च अवर्णयत् । तदा भृगुः विष्णुं त्वं सर्वोत्तमः त्वं सर्वदेवेषु उत्तमः, त्वं परिपूर्ण इत्येवम् अस्तौत् । त्वद्भुक्तोच्छिष्टं शेषं वै पितृणां, देवानां, ब्राह्मणानां च सेव्यं स्यात् नान्येषां कथञ्चन । इत्येवं वासुदेवं नानाविधैः स्तोत्रैः अस्तौत् ।

**विशेषविचारः -**

१. नारीसङ्गममग्नोऽसौ ................ (पद्म.पु.उ.खं. २८२.३२-३६)

रुद्रः लिङ्गरूपेण पूज्यः । तस्य निर्माल्यादिकं स्वीकारानर्हाश्च भृगुशापेन अभूवन् ।

धर्मशास्त्रम् -

१.रुद्रभक्ताश्च ये लोके ...... (पद्म.पु.उ.खं.२८२.३५)

रुद्रभक्ताः ते पाषाण्डिनः ...... ।

२. समस्तसम्पत्समवाप्तिहेतवः ......... । (पद्म.पु.उ.खं.२८२.४९)

ब्राह्मणश्रैष्ठ्यनिरूपणश्लोकः । स्वतः विष्णुनैव निरूपितम् ।

३. त्वद्भक्तोच्छिष्टशेषं वै ........... (पद्म.पु.उ.खं.२८२.६०-६१)

विष्णुना भुक्तोच्छिष्टं सर्वैः देवैः पितृभिः ब्राह्मणैश्च सेव्यम् ।

४. इतरेषां तु देवानां ........... (पद्म.पु.उ.खं. २८२.६१-६७)

इतरदेवानां नैवेद्यं गर्हितम्, वैष्णवलक्षणम्, तप्तमुद्राधारणम् इत्यादिकं च अत्र वर्णितम् ।

*****

**अनुवादकः - डा.श्रीकान्त बायरि**